# आज्ञा गुरूणां हि अविचारणीया

1. *कस्मिंश्चित् नगरे चन्द्रो नाम भूपतिः प्रतिवसति स्म। तस्य पुत्राः वानरक्रीडारताः वानरयूथं नित्यमेव विविधैः भोज्यपदार्थैः पुष्टिं नयन्ति स्म। तस्मिन् राजगृहे बालवाहनयोग्यं मेषयूथम् आसीत्। तेषां मेषाणां मध्ये एको मेषः जिह्वालोलुपतया अहर्निशं महानसं प्रविश्य यत् पश्यति तद् भक्षयति। ते च सूपकाराः यत्किञ्चित् काष्ठं, मृण्मयं भाजनं, कांस्यताम्रपात्रं वा पश्यन्ति तेन तम् आशु ताडयन्ति स्म।*

*मेषस्य सूपकाराणां च कलहम् अवेक्ष्य नीतिविदाम् अग्रणीः वानरयूथपतिः अचिन्तयत्–'एतेषां कलहो न वानराणां हिताय।' एवं विचार्य स यूथपः सर्वान् कपीन् आहूय रहसि अवदत्–*

*सूपकाराणाम् मेषेण सह एषः कलहः नूनं भवतां विनाशकारणं भविष्यति। उक्तम् हि–*

*तस्मात् स्यात् कलहो यत्र गृहे नित्यमकारणः।*
*तद्गृहं जीवितं वाञ्छन् दूरतः परिवर्जयेत्॥ 1॥*

**हिंदी अनुवाद (Hindi Translation)**

किसी नगर में चन्द्र नाम का एक राजा रहता था। उसके पुत्र प्रतिदिन बन्दरों के साथ खेलने में लीन रहते थे और बन्दरों को अनेक प्रकार के भोज्य पदार्थों से हृष्ट-पुष्ट बनाते थे। उस राजदरबार में राजकुमारों की सवारी के योग्य भेड़ों का समूह भी था। उन भेड़ों के बीच में एक भेड़ अपनी जिह्वा के चटोरेपन के कारण प्रतिदिन रसोईघर में घुसकर रसोई में जो कुछ भी देखता उसे ही खा जाता और वे रसोइए लकड़ी, मिट्टी, काँसे या ताँबे के बर्तन जो कुछ भी देखते उसी से उसे तुरन्त पीट (मार) देते।

भेड़ और रसोइयों के इस झगड़े को देखकर नीतिज्ञों में अग्रणी बन्दरों के स्वामी ने सोचा। इनका यह झगड़ा बन्दरों के हित के लिए नहीं है। ऐसा सोचकर वह यूथपति जो बन्दरों के समूह का स्वामी था। सभी बन्दरों को एकान्त में बुलाकर बोला—रसोइयों का भेड़ के साथ होने वाला यह झगड़ा अवश्य ही आपके विनाश का कारण होगा। कहा भी है—

जिस घर में बिना किसी कारण के नित्य झगड़ा होता हो जीवन चाहने वाले को वह घर दूर से ही छोड़ देना चाहिए।

**अन्वयः (Prose-order)**

तस्मात् स्यात् कलहो यत्र गृहे नित्यमकारणः।
तद्गृहं जीवितं वाञ्छन् दूरतः परिवर्जयेत्॥ 1॥

**मञ्जूषायाः सहायतया श्लोकस्य अन्वयं रिक्तस्थानानि पूरयन् लिखतु भवान्–**

तस्मात् यत्र गृहे–(i) .................... अकारणः कलहः (ii) .................... जीवितं (iii) .................... तत् गृहं (iv) .................... परिवर्जयेत्।

**मञ्जूषा–** दूरतः, वाञ्छन्, स्यात्, नित्यम्

**उत्तराणि–** (i) नित्यम्, (ii) स्यात् (iii) वाञ्छन् (iv) दूरतः।

**शब्दार्थाः (Word-meanings Sanskrit to Sanskrit, Hindi and English)**

**आज्ञा**–आदेशः, आदेश (Order)। **मेषः**–एडकः, भेड़ा (Ram)। **अहर्निशम्**–रात्रिदिवम्, दिन-रात (Day and night)। **सूपकाराः**–पाचकाः, रसोइए (Cooks)। **भाजनम्**–पात्रम्, बरतन (Pot)। **आशु**–शीघ्रम्, जल्दी (Quick)। **यूथपः**–वृन्दरक्षकः, समूह का रक्षक (Protector of the flock)।

**संस्कृते भावार्थः (Summary)**

**तस्मात् स्यात् कलहो यत्र गृहे नित्यमकारणः।**
**तद्गृहं जीवितं वाञ्छन् दूरतः परिवर्जयेत्॥ 1॥**

**निम्न श्लोकं पठित्वा सरल संस्कृते भावार्थः लिख्यताम् (सहायतायै मञ्जूषा अपि दत्ता)।**

यदि कश्चित् नरः (i) .................... इच्छति तर्हि सः तत् (ii) .................... अवश्यमेव त्यजेत् यत्र नित्यम् (iii) .................... भवति। यतो हि (iv) .................... कलहः सर्वदा विनाशस्य कारणं भवति।

**मञ्जूषा–** अकारणः, सुखी जीवनम्, कलहः, गृहम्

**उत्तराणि–** (i) सुखी जीवनम्, (ii) गृहम्, (iii) कलहः, (iv) अकारण:

**समासाः (Compounds)**

| | | |
|---|---|---|
| **वानरक्रीडारताः** | – | वानराणाम् (षष्ठी तत्पुरुष) क्रीडायाम् (सप्तमी तत्पुरुषः) रताः। |
| **वानरयूथम्** | – | वानराणाम् यूथम् (षष्ठी तत्पुरुषः)। |
| **अहर्निशम्** | – | अहः च निशा च (द्वन्द्वः)। |
| **सूपकाराः** | – | सूपम् कुर्वन्ति इति (उपपद तत्पुरुषः)। |
| **यूथपः** | – | यूथम् पाति इति (उपपद तत्पुरुषः)। |

**सन्धि-विच्छेदः (Disjoin Sandhi)**

| | | |
|---|---|---|
| **कस्मिंश्चित्** | – कस्मिन् + | चित्। |
| **चन्द्रो नाम** | – चन्द्रः + | नाम। |
| **किञ्चित्** | – किम् + | चित्। |
| **तद्गृहम्** | – तत् + | गृहम्। |
| **जीवितं वाञ्छन्** | – जीवितम् + | वाञ्छन्। |

**प्रत्ययाः (Suffixes)**

| | | |
|---|---|---|
| **लोलुपतया** | – लोलुप + | तल्। |
| **विचार्य** | – वि + | √चर् + ल्यप्। |
| **आहूय** | – आ + | ह्वे + ल्यप्। |
| **उक्तम्** | – वच् + | क्त। |

**प्रश्नाः (Questions)**

**(I) एकपदेन उत्तरत–**

(*i*) भूपतेः नाम किम् आसीत्?

(*ii*) कः वानराणां विनाशकारणं भविष्यति?

**(II) पूर्णवाक्येन उत्तरत–**

(*i*) कः रहस्यम् अवदत्?

(*ii*) यूथपः कान् रहसि अवदत्?

**(III) भाषिककार्यम्–**

(*i*) 'एकान्ते' इति अर्थे किं पदं प्रयुक्तम्?

(क) रहसि (ख) अवेक्ष्य (ग) आशु (घ) पुष्टिम्

(*ii*) 'बालवाहनयोग्यम्' इति पदस्य विशेष्यपदं किम्?

(क) मेषम् (ख) यूथम् (ग) मेषयूथम् (घ) वानरयूथम्

(*iii*) 'ताडयन्ति स्म' इति क्रियायाः कर्तृपदं किम्?

(क) बालकाः (ख) राजपुत्राः (ग) वानराः (घ) सूपकाराः

(*iv*) 'भाजनम्' इति पदस्य पर्यायपदं गद्यांशात् एव चित्वा लिखत।

(क) कलहं (ख) पात्रं (ग) मृणत्वं (घ) काष्ठं

**उत्तराणि–** (I) (*i*) चन्द्रः। (*ii*) कलहः।

(II) (*i*) यूथपः रहस्यम् अवदत्। (*ii*) यूथपः कपीन् रहसि अवदत्।

(III) (*i*) (क) रहसि। (*ii*) (ग) मेषयूथम्। (*iii*) (घ) सूपकाराः। (*iv*) (ख) पात्रं।

**प्रश्ननिर्माणम्–**

(*i*) यूथपः सर्वान् कपीन् आहूय **रहसि** अवदत्।

(*ii*) कस्मिंश्चित् नगरे **चन्द्रो** नाम भूपतिः प्रतिवसति स्म।

(*iii*) **एतेषां** कलहः न वानराणां हिताय।

(*iv*) **राजपुत्राः** वानरयूथं नित्यं पुष्टिं नयन्ति स्म।

(*v*) तेन **तम्** आशु ताडयन्ति स्म।

**उत्तराणि–** (*i*) कुत्र। (*ii*) किम् (*iii*) केषाम् (*iv*) के (*v*) कम्।

**2.** ***ततः सर्वेषां संक्षयो न भवेत्, तदेतद् राजभवनं परित्यज्य वनं गच्छामः। यतः–***

***'कलहान्तानि हर्म्याणि कुवाक्यान्तं च सौहृदम्।***
***कुराजान्तानि राष्ट्राणि कुकर्मान्तं यशो नृणाम्॥ 2॥'***

**हिंदी अनुवाद (Hindi Translation)**

इसीलिए कहीं हम सभी का विनाश न हो जाए इसीलिए राजभवन को छोड़कर वन को जाते हैं। क्योंकि—झगड़ों से राजमहलों का अन्त हो जाता है। बुरे वाक्य बोलने से मित्रता का विनाश हो जाता है। बुरे शासन से देश का विनाश हो जाता है। दुष्कर्म से मनुष्यों का यश नष्ट हो जाता है।

**अन्वयः (Prose-order)**

**'कलहान्तानि हर्म्याणि कुवाक्यान्तं च सौहृदम्।**
**कुराजान्तानि राष्ट्राणि कुकर्मान्तं यशो नृणाम्॥ 2॥'**

हर्म्याणि-(i) .................... (भवन्ति), सौहृदम् च (ii) .................... (भवति) राष्ट्राणि कुराजान्तानि (भवन्ति) (iii) .................... यशः च (iv) .................... (भवति)।

**मञ्जूषा–** | कुकर्मान्तं, कलहान्तानि, कुवाक्यान्तं, नृणां |

**उत्तराणि–** (i) कलहान्तानि (ii) कुवाक्यान्तं (iii) नृणां (iv) कुकर्मान्तं।

**शब्दार्थाः (Word-meanings Sanskrit to Sanskrit, Hindi and English)**

**संक्षयः**–विनाशः, विनाश (Destruction)। **हर्म्याणि**–प्रासादाः, महल (Palaces)। **सौहृदम्**–मित्रता, मैत्री (Friendship)। **नृणाम्**–जनानाम्, लोगों का (of Peoples)।

**संस्कृते भावार्थः (Summary)**

**कलहान्तानि हर्म्याणि कुवाक्यान्तं च सौहृदम्।**
**कुराजान्तानि राष्ट्राणि कुकर्मान्तं यशो नृणाम्॥ 2॥**

अस्य भावार्थः अस्ति यत् (i) .................... राजप्रासादाः नश्यन्ते। कुवाक्यैः अपभाषणेन वा (ii) .................... नश्यते। एवमेव दुष्टनृपैः (iii) .................... नश्यन्ते कुकर्मणा च (iv) .................... यशः विनष्टं गच्छति।

**मञ्जूषा–** | विवादैः, मनुष्याणां, मैत्री, राष्ट्राणि |

**उत्तराणि–** (i) विवादैः (ii) मैत्री (iii) राष्ट्राणि (iv) मनुष्याणां।

**समासाः (Compounds)**

**राजभवनम्** – राज्ञः भवनम् (षष्ठी तत्पुरुषः)।
**कुवाक्यम्** – कुत्सितं वाक्यम् (कर्मधारयः)।

**प्रत्ययः (Suffix)**

**परित्यज्य** – परि + त्यज् + ल्यप्।

**सन्धि-विच्छेदः (Disjoin Sandhi)**

**तदेतद्** – तत् + एतत् (व्यंजन सन्धिः)।
**कलहान्तानि** – कलह + अन्तानि (दीर्घ सन्धिः)।
**कुराजान्तानि** – कुराज + अन्तानि (दीर्घ सन्धिः)।
**कुकर्मान्तं** – कुकर्म + अन्तं (दीर्घ सन्धिः)।

**प्रश्नाः (Questions)**

**(I) एकपदेन उत्तरत–**

(*i*) कलहान्तानि कानि त्यजेत्?
(*ii*) यूथपः कुत्र गन्तुम् कथयति?

**(II) पूर्णवाक्येन उत्तरत–**

(*i*) कः राजभवनम् त्यक्तुम् कथयति?
(*ii*) कीदृशम् सौहृदम् त्यक्तव्यम्?

**(III) भाषिककार्यम्–**

(i) 'नराणाम्' पदस्य अर्थे किं पदम् अत्र प्रदत्तम्?

(क) नृणाम् (ख) सर्वेषाम् (ग) राष्ट्राणि (घ) संक्षयः

(ii) 'यशः' इति पदे कः मूलशब्दः ?

(क) यश (ख) यशस् (ग) यशो (घ) यशम्

(iii) 'भवेत्' इति क्रियायाः कर्तृपदं किम्?

(क) ततः (ख) सर्वेषाम् (ग) संक्षयम् (घ) संक्षयः

(iv) 'कलहान्तानि हर्म्याणि' इति अनयोः पदयोः विशेष्यपदं किम्?

(क) कलह (ख) अन्तानि (ग) कलहन्तानि (घ) हर्म्याणि

**उत्तराणि–** (I) (i) हर्म्याणि। (ii) वनम्।

(II) (i) यूथपः राजभवनम् त्यक्तुम् कथयति। (ii) कुवाक्यान्तम् सौहृदम् त्यक्तव्यम्।

(III) (i) (क) नृणाम् (ii) (ख) यशस् (iii) (घ) संक्षयः (iv) (घ) हर्म्याणि।

**प्रश्ननिर्माणम्–**

(i) वयं राजभवनं परित्यज्य **वनं** गच्छामः।

(ii) नृणां **यशः** कुकर्मणा अन्तं भवति।

(iii) कलहः **हर्म्याणि** अन्तानि करोति।

(iv) ततः **सर्वेषां** नाशः न भवेत्।

(v) **कुवाक्येन** सौहृदम् नाशं गच्छति।

**उत्तराणि–** (i) कुत्र। (ii) किम् (iii) कानि (iv) केषाम् (v) केन।

***3. तस्य वचनम् अश्रद्धेयं मत्वा मदोद्धताः कपयः प्रहस्य अवदन्–'भो! किमिदम् उच्यते?' न वयं स्वर्गसमानोपभोगान् विहाय अटव्यां क्षार-तिक्त-कषाय-कटु-रूक्षफलानि भक्षयिष्यामः।' तच्छ्रुत्वा साश्रुनयनो यूथपतिः सगद्गदम् उक्तवान्–'रसनास्वादलुब्धाः यूयम् अस्य सुखस्य कुपरिणामं न जानीथ। अहं तु वनं गच्छामि।'***

## हिंदी अनुवाद (Hindi Translation)

उस समूह के स्वामी के वचन को श्रद्धाहीन मानकर मद से मस्त वानर हँसते हुए बोले—यह क्या कह रहे हैं? हम स्वर्ग के समान उपभोगों को छोड़कर जंगल में खारे, तीखे, कसैले, कड़वे और रूखे फलों को नहीं खाएँगे। यह सुनकर आँसुओं से युक्त नेत्रों वाले समूह का स्वामी गद्गद् स्वर में बोला–'जीभ के स्वाद के लालच में तुम इस (स्वर्ग के समान उपभोगों के) सुख के दुष्परिणाम को नहीं जानते हो। मैं तो वन को जा रहा हूँ।'

## शब्दार्थाः (Word-meanings Sanskrit to Sanskrit, Hindi and English)

**कपयः**–वानराः, बन्दर (Monkeys)। **प्रहस्य**–हसित्वा, हँसकर (After laughing)। **विहाय**–त्यक्त्वा, छोड़कर (After leaving)। **उक्तवान्**–कथितवान्, बोला (Said)।

## समासाः (Compounds)

| | | |
|---|---|---|
| **तस्य वचनम्** | – | तद्वचनम् (षष्ठी तत्पुरुषः)। |
| **मदोद्धताः** | – | मदेन उद्धताः (तृतीया तत्पुरुषः)। |
| **यूथपतिः** | – | यूथस्य पतिः (षष्ठी तत्पुरुषः)। |
| **सगद्गदम्** | – | गद्गदेन सह (अव्ययीभावः)। |
| **अश्रद्धेयं** | – | न श्रद्धेयम् (नञ् तत्पुरुषः)। |
| **कुपरिणामम्** | – | कुत्सितं परिणामम् (कर्मधारयः)। |
| **साश्रुनयनः** | – | अश्रूणि नयनयोः यस्य सः (बहुव्रीहिः)। |
| **रसनास्वादलुब्धाः** | – | रसनायाः स्वादेन लुब्धाः (षष्ठी, तृतीया तत्पुरुषः)। |

**प्रत्यया: (Suffixes)**

| | | |
|---|---|---|
| **प्रहस्य** | – प्र | + √हस् + ल्यप्। |
| **विहाय** | – वि | + √हा + ल्यप्। |
| **उक्तवान्** | – √वच् | + क्तवतु। |
| **मत्वा** | – √मन् | + √क्त्वा। |

**सन्धि-विच्छेद: (Disjoin Sandhi)**

| | | |
|---|---|---|
| **तच्छ्रुत्वा** | – तत् | + श्रुत्वा (छत्वसन्धि:)। |
| **मदोद्धता:** | – मद | + उद्धता: (गुण सन्धि:)। |
| **स्वर्गसमानोपभोगान्** | – स्वर्गसमान | + उपभोगान् (गुण सन्धि:)। |
| **साश्रुनयन:** | – स | + अश्रुनयन: (दीर्घ सन्धि:) |

**प्रश्ना: (Questions)**

**(I) एकपदेन उत्तरत–**

(*i*) वानरा: कस्य वचनम् न अमन्यन्त ? (*ii*) क: वनम् गन्तुम् तत्पर: भवति ?

**(II) पूर्णवाक्येन उत्तरत्–**

वानरा: कीदृशानि फलानि भक्षयितुम् तत्परा: न भवन्ति ?

**(III) भाषिककार्यम्–**

(*i*) अत्र 'अहम्' पदम् कस्मै प्रयुक्तम् ?

(क) वानरेभ्य: (ख) यूथपतये (ग) मेषाय (घ) सूपकाराय

(*ii*) 'न श्रद्धेयम्' इति स्थाने किं पदं प्रयुक्तम् ?

(क) अश्रद्धेयम् (ख) विहाय (ग) प्रहस्य (घ) सगद्गदम्

(*iii*) 'अटव्याम्' इति पदस्य अर्थम् गद्यांशात् एव चित्वा लिखत।

(क) गृहं (ख) महानसं (ग) प्रासादं (घ) वनं

(*iv*) 'साश्रुनयन:' इति विशेषणस्य विशेष्य: क: ?

(क) मेष: (ख) वानर: (ग) यूथपति: (घ) सूपकार:

(*v*) 'यूयम्' इति सर्वनाम पदस्य प्रयोग: केभ्य: अभवत् ?

(क) कपिभ्य: (ख) सूपकारेभ्य: (ग) एडकेभ्य: (घ) यूथपतिभ्य:

(*vi*) 'वयम्' इति कर्तृपदस्य क्रियापदम् किम् ?

(क) भक्षयिष्याम: (ख) खादिष्याम: (ग) गमिष्याम: (घ) चलिष्याम:

(*vii*) 'त्यक्त्वा' इति कस्य पदस्य अर्थ: ?

(क) मत्वा (ख) विहाय (ग) प्रहस्य (घ) कषाय

(*viii*) 'कुत्सितम्' इति कस्य पदस्य अर्थ: ?

(क) कुशलम् इति पदस्य (ख) कुपरिणामम् इति पदस्य

(ग) अश्रद्धेयम् इति पदस्य (घ) सगद्गदम् इति पदस्य

(*ix*) 'उक्तवान्' इति क्रियाया: कर्तृपदं किम् ?

(क) यूथपति: (ख) वानर: (ग) सूपकार: (घ) मेष:

**उत्तराणि–** (I) (*i*) यूथपते: (*ii*) यूथप:।

(II) वानरा: क्षार-तिक्त-कषाय-कटु-रुक्षफलानि भक्षयितुम् तत्परा: न भवन्ति।

(III) (*i*) (ख) यूथपतये। (*ii*) (क) अश्रद्धेयम्। (*iii*) (घ) वनं। (*iv*) (ग) यूथपति:। (*v*) (क) कपिभ्य:। (*vi*) (क) भक्षयिष्याम:। (*vii*) (ख) विहाय। (*viii*) (ख) कुपरिणामम् इति पदस्य। (*ix*) (क) यूथपति:।

**प्रश्ननिर्माणम्–**

(*i*) **मदोद्धता:** कपय: प्रहस्य अवदन्। (*ii*) **वयं** रुक्षफलानि वने न भक्षयिष्याम:।

(*iii*) अहं तु **वनं** गच्छामि। (*iv*) **यूयम्** अस्य सुखस्य कुपरिणामं न जानीथ।

(*v*) कपय: तस्य वचनम् **अश्रद्धेयम्** अमन्यन्त।

**उत्तराणि–** (*i*) कीदृशा: (*ii*) के (*iii*) कुत्र (*iv*) के (*v*) कीदृशम्।

***4. अथ अन्यस्मिन् अहनि स मेषो यावत् महानसं प्रविशति तावत् सूपकारेण अर्धज्वलितकाष्ठेन ताडित:। ऊर्णाप्रचुर: मेष: वह्निना जाज्वल्यमानशरीर: निकटस्थाम् अश्वशालां प्रविशति दाहवेदनया च भूमौ लुठति। तस्य क्षितौ प्रलुठत: तृणेषु वह्निज्वाला: समुत्थिता:।***

***ज्वालमालाकुला: अश्वा: प्राणत्राणाय इतस्तत: अधावन्। तेषु केचिद् दग्धा: केचिद् अर्धदग्धा: केचन च पञ्चत्वं गता:। दग्धां हयशालां विज्ञाय सविषाद: राजा शालिहोत्रज्ञान् वैद्यान् आहूय अपृच्छत्–'हा! दग्धा: मे घोटका: कथं रक्षणीया:? सपदि उपाय: क्रियताम्।' तदा राजवैद्य: प्रोवाच–***

***'कपीनां मेदसा दोषो वह्निदाहसमुद्भव:।***
***अश्वानां नाशमभ्येति तम: सूर्योदये यथा॥ 3॥'***

## हिंदी अनुवाद (Hindi Translation)

उसके बाद दूसरे दिन वह (नर) भेड़ ज्यों ही रसोई में घुसा त्यों ही रसोइए ने आधी जली हुई लकड़ी उसे दे मारी। ऊन से भरा हुआ तथा आग से दहकते हुए शरीर वाला वह भेड़ पास के घुड़साल में घुस गया और जलने की पीड़ा से भूमि पर लोटने लगा। उसके भूमि पर लोटने से उठती हुई आग की लपटें घास में चारों ओर फैल गईं।

धधकती हुई आग की लपटों से व्याकुल घोड़ों में से कई जल गए, कुछ आधे जल गए और कुछ पाँच तत्वों में मिल गए अर्थात् मर गए। जली हुई घुड़शाल (अस्तबल) को देखकर अत्यन्त दुखी राजा ने पशुचिकित्सकों को बुलाकर पूछा—हाय! जले हुए मेरे घोड़े कैसे बचाए जाएँ? तुरन्त कोई उपाय करो। तब राजा का वैद्य बोला—आग लगने से होने वाला घोड़ों का घाव बन्दरों की चर्बी से उस प्रकार समाप्त हो जाता है जिस प्रकार सूर्य के निकलने पर अन्धकार नष्ट हो जाता है।

## अन्वय: (Prose-order)

**'कपीनां मेदसा दोषो वह्निदाहसमुद्भव:।**
**अश्वानां नाशमभ्येति तम: सूर्योदये यथा॥ 3॥'**

अश्वानां-(i) ………………… समुद्भव: (ii) ………………… कपीनां मेदसा (तथैव) (iii) ………………… अभ्येति यथा (iv) ………………… तम:॥

**मञ्जूषा–** सूर्योदये, नाशम्, दोष:, वह्निदाह

**उत्तराणि–** (i) वह्निदाह (ii) दोष: (iii) नाशम् (iv) सूर्योदये।

## शब्दार्था: (Word–meanings Sanskrit to Sanskrit, Hindi and English)

**अहनि**—दिवसे, दिन में (Day time)। **महानसं**–पाकशालाम्, रसोई में (In the kitchen)। **क्षितौ**—भूमौ, भूमि पर (On the earth)। **पञ्चत्वं गता:**—मृता:, मर गए (Expired)। **समुद्भव:**—उत्पन्न: पैदा हुआ (created)। **सपदि**—शीघ्रम्, जल्दी (Soon)।

## संस्कृते भावार्थ: (Summary)

**'कपीनां मेदसा दोषो वह्निदाहसमुद्भव:।**
**अश्वानां नाशमभ्येति तम: सूर्योदये यथा॥ 3॥'**

अस्य भावार्थ: अस्ति यत्-यथा सूर्यस्य (i) ………………… अन्धकार: नश्यति तथैव (ii) ………………… मेदसा अश्वानाम् (iii) ………………… समुत्पन्न: (iv) ………………… विनश्यति।

**मञ्जूषा–** कपीनाम्, दोष:, उदये, वह्निदाहात्

**उत्तराणि–** (i) उदये (ii) कपीनाम् (iii) वह्निदाहात् (iv) दोष:।

## समासा: (Compounds)

| | | |
|---|---|---|
| **ऊर्णाप्रचुर:** | – | ऊर्णया प्रचुर: (तृतीया तत्पुरुष:)। |
| **वह्निज्वाला:** | – | वह्ने: ज्वाला: (षष्ठी तत्पुरुष:)। |
| **राजवैद्य:** | – | राज्ञ: वैद्य: (षष्ठी तत्पुरुष:)। |
| **अन्यस्मिन् अहनि** | – | अन्याहनि (कर्मधारय:)। |
| **सूर्योदये** | – | सूर्यस्य उदये (षष्ठी तत्पुरुष:)। |
| **जाज्वल्यमानशरीर:** | – | जाज्वल्यमानं शरीरं यस्य स: (बहुव्रीहि:) |
| **निकटस्थाम्** | – | निकटे स्थिता, ताम् (सप्तमी तत्पुरुष:)। |
| **दाहवेदनया** | – | दाहस्य वेदना, तया (षष्ठी तत्पुरुष:)। |
| **ज्वालमालाकुला:** | – | ज्वालानां मालाभि: आकुला: (षष्ठी, तृतीया तत्पुरुष:)। |

## प्रत्यया: (Suffixes)

| | | |
|---|---|---|
| **समुत्थिता:** | – | सम् + उत् + √स्था + क्त। |
| **दग्धा:** | – | √दह् + क्त। |
| **पञ्चत्वम्** | – | पञ्च + त्व। |
| **रक्षणीया:** | – | √रक्ष् + अनीयर्। |
| **ताडित:** | – | √ताड् + क्त। |
| **गता:** | – | गम् + क्त। |
| **विज्ञाय** | – | वि + ज्ञा + ल्यप्। |
| **आहूय** | – | आ + √ह्वे + ल्यप्। |

## सन्धि-विच्छेद: (Disjoin Sandhi)

| | | |
|---|---|---|
| **प्रोवाच** | – | प्र + उवाच (गुण सन्धि:)। |
| **सूर्योदये** | – | सूर्य + उदये (गुण सन्धि:)। |
| **ज्वालमालाकुला:** | – | ज्वालमाला + आकुला: (दीर्घ सन्धि:)। |
| **इतस्तत:** | – | इत: + तत: (विसर्ग सन्धि:)। |

## प्रश्ना: (Questions)

**(I) एकपदेन उत्तरत–**

(*i*) के रक्षणीया: आसन्?

(*ii*) सूर्योदये किम् विनश्यति?

**(II) पूर्णवाक्येन उत्तरत–**

(*i*) के इतस्तत: अधावन्?

(*ii*) रक्षणीया: के?

**(III) भाषिककार्यम्–**

(*i*) 'शीघ्रम्' इत्यर्थे किम् पदम् प्रयुक्तम्?

(क) पञ्चत्वं (ख) सपदि (ग) महानसं (घ) कथं

(*ii*) 'घोटका:' इति पदस्य पर्याय पदम् गद्यांशात् एव चित्वा लिखत।

(क) अश्वा: (ख) दग्धा: (ग) भूमौ (घ) रक्षणीया:

(*iii*) गद्यांशे 'मे' इति सर्वनामपदस्य प्रयोग: कस्मै वर्तते?

(क) अश्वाय (ख) मेषाय (ग) राज्ञे (घ) वैद्याय

(*iv*) 'केचिद्' इति पदस्य पर्यायपदं किम् प्रयुक्तम्?

(क) कश्चित् (ख) केनचित् (ग) कस्मैचित् (घ) केचन

(*v*) 'दग्धा:' इति पदे का मूलधातु: ?

(क) दध् (ख) दघ् (ग) दह् (घ) दाह्

(*vi*) 'भूमौ' इति पदस्य पर्यायपदम् अनुच्छेदात् एव चित्वा लिखत।

(क) पृथिव्यां (ख) क्षितौ (ग) धरायां (घ) धरित्र्यां

(*vii*) 'हयशालाम्' इति पदस्य अर्थ: 'अश्वशालाम्' अस्ति पाकशालाम् वा ?

(क) पाकशाला (ख) पाकशालाम् (ग) अश्वशालाम् (घ) अश्वशाला

**उत्तराणि–** (I) (*i*) अश्वा:। (*ii*) तम:।

(II) (*i*) अश्वा: इतस्तत: अधावन्। (*ii*) अश्वा: रक्षणीया: सन्ति।

(III) (*i*) (ख) सपादि। (*ii*) (क) अश्वा:।

(*iii*) (ग) राज्ञे। (*iv*) (घ) केचन।

(*v*) (ग) दह्। (*vi*) (ख) क्षितौ।

(*vii*) (ग) अश्वशालाम्

**प्रश्ननिर्माणम्–**

(*i*) तृणेषु **वह्निज्वाला:** समुत्थिता:। (*ii*) सूपकारण **मेष:** अर्धज्वलित काष्ठेन ताडित:।

(*iii*) मेष: **भूमौ** लुढति। (*iv*) सूर्योदये **तम:** नाशम् अभ्येति।

(*v*) राजा शालिहोत्रज्ञान् **वैद्यान्** आहूय अपृच्छत्।

**उत्तराणि–** (*i*) का: (*ii*) क: (*iii*) कुत्र (*iv*) किम् (*v*) कान्।

**5. *'यथोचितं क्रियताम्' इति राजादेशं श्रुत्वा सर्वे भयत्रस्ता: कपय: अचिन्तयन्– 'हा! हता: वयम्। अवधीरिता: अस्माभि: गुरुजनोपदेशा:। उक्तम् हि***

***मित्ररूपा: हि रिपव: सम्भाष्यन्ते विचक्षणै:।***
***ये हितं वाक्यमुत्सृज्य विपरीतोपसेविन:॥ 4॥***

## हिंदी अनुवाद (Hindi Translation)

'जैसा उचित हो वैसा कीजिए' राजा का ऐसा आदेश सुनकर भय से दु:खी बन्दरों ने सोचा—हाय! हम मारे गए। हमने अपने गुरु के उपदेश को नहीं माना। कहा गया है—जो हितकारी वाक्य को छोड़कर उससे विपरीत का सेवन करने वाले होते हैं, बुद्धिमान लोग उन्हें मित्र रूप में शत्रु ही कहते हैं।

## अन्वय: (Prose-order)

**मित्ररूपा: हि रिपव: सम्भाष्यन्ते विचक्षणै:।**
**ये हितं वाक्यमुत्सृज्य विपरीतोपसेविन:॥ 4॥**

ये हितं (i) ........................ उत्सृज्य विपरीत (ii) ........................ (ते) विचक्षणै: (iii) ........................ हि (iv) .................... सम्भाष्यन्ते।

**मञ्जूषा–** | मित्ररूपा:, उपसेविन:, रिपव:, वाक्यम् |

**उत्तराणि–** (i) वाक्यम् (ii) उपसेविन: (iii) मित्ररूपा: (iv) रिपव:।

## शब्दार्था: (Word-meanings Sanskrit to Sanskrit, Hindi and English)

**हता:**–मृता:, मारे गए (Expired)। **अवधीरिता:**–न मानिता:, नहीं माना (Not followed)। **विचक्षणै:**–प्राज्ञै:, बुद्धिमानों द्वारा (By wisemen)। **उत्सृज्य**–त्यक्त्वा, छोड़कर (Having released)। **भयत्रस्ता:**–भयात् भीता: भय से डरे हुए।

## संस्कृते भावार्थ: (Summary)

**मित्ररूपा: हि रिपव: सम्भाष्यन्ते विचक्षणै:।**
**ये हितं वाक्यमुत्सृज्य विपरीतोपसेविन:॥ 4॥**

अस्य भावार्थ: अस्ति यत्–(i) ........................ एतादृशाणि मित्राणि अपि (ii) ........................ कथ्यन्ते ये हितकराणि (iii) ........................ परित्यज्य विपरीतं (iv) ........................।

**मञ्जूषा–** | रिपव:, सेवन्ते, वाक्यानि, विद्वद्भि: |

**उत्तराणि–** (i) विद्वद्भि: (ii) रिपव: (iii) वाक्यानि (iv) सेवन्ते।

## समासा: (Compounds)

| | | |
|---|---|---|
| **भयत्रस्ता:** | – | भयात् त्रस्ता: (पञ्चमी तत्पुरुष:)। |
| **गुरुजनोपदेशा:** | – | गुरुजनानाम् उपदेशा: (षष्ठी तत्पुरुष:)। |
| **भयत्रस्ता: कपय:** | – | भयत्रस्तकपय: (कर्मधारय:)। |
| **हितम् वाक्यम्** | – | हितवाक्यम् (कर्मधारय:)। |
| **यथोचितं** | – | उचितम् अनतिक्रम्य (अव्ययीभाव:) |
| **राजादेशम्** | – | राज्ञ: आदेशम् (षष्ठी तत्पुरुष:)। |
| **मित्ररूपा:** | – | मित्राणाम् रूपा: (षष्ठी तत्पुरुष:)। |
| **विपरीतोपसेविन:** | – | विपरीतम् उपसेवन्ते इति (उपपद तत्पुरुष:)। |

**प्रत्यया: (Suffixes)**

**श्रुत्वा** – √श्रु + क्त्वा।
**उक्तम्** – √वच् + क्त।
**उत्सृज्य** – उत् + √सृज् + ल्यप्।
**सेविन:** – सेवा + इन्।
**त्रस्ता:** – √त्रस् + क्त।

**सन्धि-विच्छेद: (Disjoin Sandhi)**

**यथोचितम्** – यथा + उचितम् (गुणसन्धि:)।
**विपरीतोपसेविन:** – विपरीत + उपसेविन: (गुणसन्धि:)।
**राजादेशं** – राज + आदेशं (दीर्घ सन्धि:)।
**गुरुजनोपदेशा:** – गुरुजन + उपदेशा: (गुण सन्धि:)।

**प्रश्ना: (Questions)**

**(I) एकपदेन उत्तरत–**

(*i*) कै: गुरुजनोपदेशा: अवधीरिता:? (*ii*) कपय: कीदृशा: आसन्?

**(II) पूर्णवाक्येन उत्तरत–**

(*i*) किम् उक्तम्? (*ii*) के भयत्रस्ता: आसन्?

**(III) भाषिककार्यम्–**

(*i*) अत्र 'वयम्' पदं केभ्य: प्रयुक्तम्?
(क) वानरेभ्य: (ख) सूपकारेभ्य: (ग) मेषेभ्य: (घ) राजपुत्रेभ्य:

(*ii*) 'उचितम् अनतिक्रम्य' इति स्थाने किं पदम् प्रयुक्तम्?
(क) अनुचितम् (ख) उपोचितम् (ग) यथोचितम् (घ) समुचितम्

(*iii*) 'रिपव:' इति पदस्य विपर्यय पदम् किम्?
(क) मित्ररूपा: (ख) मित्राणि (ग) मित्रा: (घ) सहायका:

(*iv*) 'उपसेविन:' पदे क: प्रत्यय:?
(क) मतुप् (ख) ठक् (ग) क्त (घ) इन्

(*v*) 'अचिन्तयन्' इति क्रियाया: कर्तृपदम् किम्?
(क) कपय: (ख) नृप: (ग) राजपुत्रा: (घ) जना:

(*vi*) 'त्यक्त्वा' इति स्थाने किं पदम् प्रयुक्तम्?
(क) श्रुत्वा (ख) उत्सृज्य (ग) हता: (घ) उक्तम्

**उत्तराणि–** (I) (*i*) वानरै: (*ii*) भयत्रस्ता:

(II) (*i*) मित्ररूपा: हि रिपव: सम्भाष्यन्ते विचक्षणै:। ये हितं वाक्यमुत्सृज्य विपरीतोपसेविन:।
(*ii*) वानरा: भयत्रस्ता: आसन्।

(III) (*i*) (क) वानरेभ्य:। (*ii*) (ग) यथोचितम्। (*iii*) (क) मित्ररूपा:। (*iv*) (घ) इन्। (*v*) (क) कपय:। (*vi*) (ख) उत्सृज्य।

**प्रश्ननिर्माणम्–**

(*i*) **राजादेशं** श्रुत्वा कपय: अचिन्तयन्।
(*ii*) **अस्माभि:** गुरुजनोपदेशा: अवधीरिता:।
(*iii*) विचक्षणै: ते **मित्ररूपा:** रिपव: सम्भाष्यन्ते।
(*iv*) ये **हितं वाक्यम्** उत्सृज्य विपरीतं सेवन्ते।
(*v*) **'यथोचितं क्रियताम्'** इति राजा अवदत्।

**उत्तराणि–** (*i*) कम् (*ii*) कै: (*iii*) कीदृशा: (*iv*) किम् (*v*) किम्

## पाठ्यपुस्तकस्य अभ्यास:
### (अनुप्रयोग:)

**प्रश्ना: (Questions)**

**1. एकपदेन संस्कृतभाषया उत्तरत (मौखिक-अभ्यासार्थम्)**

(क) राजपुत्रा: प्रासादे **कै:** सह क्रीडन्ति स्म?
(ख) राजगृहे **कीदृशं** मेषयूथम् आसीत्?
(ग) जिह्वालोलुपतया मेष: **कुत्र** प्रविशति स्म?
(घ) **के** पाकशालां प्रविष्टं मेषं ताडयन्ति स्म?
(ङ) **केन** जाज्वल्यमानशरीर: मेष: अश्वशालां प्रविशति?
(च) मेषस्य क्षितौ प्रलुठत: तृणेषु **का:** समुत्थिता:?
(छ) **किमर्थम्** अश्वा: इतस्तत: अधावन्?
(ज) **केषां** वह्निदोष: कपीनां मेदसा शाम्यति?
(झ) **कस्य** आदेशं श्रुत्वा सर्वे कपय: भयत्रस्ता: जाता:?
(ञ) **केषाम्** आज्ञा अविचारणीया भवति?

**उत्तराणि–** (क) वानरै: (ख) बालवाहनयोग्यम् (ग) महानसम् (घ) सूपकारा: (ङ) वह्निना (च) वह्निज्वाला: (छ) प्राणत्राणाय (ज) अश्वानाम् (झ) राज्ञ: (ञ) गुरूणाम्।

**2. अधोलिखितवाक्येषु स्थूलपदानि आधृत्य प्रश्ननिर्माणं कुरुत–**

**यथा–** कथनम्—राजपुत्राः वानरयूथं **भोज्यपदार्थैः** पुष्टिं नयन्ति स्म।

**प्रश्नः** राजपुत्राः वानरयूथं **कैः** पुष्टिं नयन्ति स्म?

(क) अश्वाः **प्राणत्राणाय** इतस्ततः अधावन्।

(ख) राजा **वैद्यान्** आहूय अश्वरक्षार्थम् अपृच्छत्।

(ग) सूपकारेण मेषः **अर्धज्वलितकाष्ठेन** ताडितः।

(घ) **प्राज्ञः** कलहयुक्तम् गृहं दूरतः परिवर्जयेत्।

(ङ) सूर्योदये **तमः** नश्यति।

(च) ज्वलन् मेषः **अश्वशालां** प्रविशति।

**उत्तराणि–** (क) किमर्थम् / कस्मै? (ख) कान्? (ग) केन? (घ) कः? (ङ) किम्? (च) कुत्र?

**3. पूर्णवाक्येन उत्तरत–**

(क) जिह्वालोलुपतया मेषः अहर्निशं किं करोति स्म?

(ख) सूपकाराः मेषं कैः वस्तुभिः ताडयन्ति स्म?

(ग) मेषस्य सूपकाराणां च कलहम् अवेक्ष्य वानरयूथपतिः किम् अचिन्तयत्?

(घ) मदोद्धताः कपयः वानरयूथपतिं किम् अवदन्?

(ङ) सविषादः राजा वैद्यान् आहूय किम् अकथयत्?

(च) राजादेशं श्रुत्वा भयत्रस्ताः कपयः किम् अचिन्तयन्?

(छ) केषाम् उपदेशाः नैव अवधीरणीयाः?

(ज) नरः कीदृशं गृहं दूरतः परिवर्जयेत्?

**उत्तराणि–** (क) जिह्वालोलुपतया मेषः महानसं प्रविश्य यत् पश्यति तत् भक्षयति।

(ख) सूपकाराः मेषं काष्ठेन, मृण्मयेन भाजनेन कांस्य-ताम्र-पात्रेण च ताडयन्ति स्म।

(ग) मेषस्य सूपकाराणां च कलहम् अवेक्ष्य वानरयूथपतिः अचिन्तयत्—"एतेषां कलहो न वानराणां हिताय।"

(घ) मदोद्धताः कपयः वानरयूथपतिम् अवदन्—"भो! किमिदमुच्यते? वयं स्वर्ग-समानोपभोगान् विहाय वनं न गमिष्यामः।

(ङ) राजा अकथयत्—"हा! दग्धाः मे घोटकाः कथं रक्षणीयाः? सपदि उपायः क्रियताम्।"

(च) राजादेशश्रुत्वा भयत्रस्ताः कपयः अचिन्तयन्—"हा! हताः वयम्। अवधीरिताः अस्माभिः गुरुजनोपदेशाः।

(छ) ये गुरुजनोपदेशान् अवधीरयन्ति तेषाम् उपदेशाः नैव अवधीरणीयाः।

(ज) यस्मिन् गृहे अकारणं कलहः भवेत् तद्गृहं नरः दूरतः परिवर्जयेत्।

**4. कोष्ठकात् शुद्धं रूपं विचित्य रिक्तस्थानानि पूरयत–**

**यथा–** एकः **मेषः** जिह्वालोलुपतया महानसं प्रविशति स्म। (वानरः / अश्वः / मेषः)

(क) मेषेण सह .................. कलहः वानराणां विनाशकारकः अभवत्। (राज्ञाम् / सूपकाराणाम् / अश्वानाम्)

(ख) वह्निना जाज्वल्यमानशरीरः मेषः .................. प्रविश्य भूमौ अलुठत्। (राजभवनम् / महानसम् / हयशालाम्)

(ग) प्राज्ञः .................. हर्म्याणि परिवर्जयेत्। (कुकर्मान्तानि / कलहान्तानि / कुराजान्तानि)

(घ) नृपतेः पुत्राः .................. सह क्रीडन्ति स्म। (अश्वैः / मेषैः / वानरैः)

(ङ) यूथपतेः वचनम् .................. मत्वा कपयः प्राहसन्। (अप्रियं / प्रियं / हितकरम्)

(च) .................. रसनास्वादलुब्धाः आसन्। (पाचकाः / मेषाः / कपयः)

(छ) मर्कटैः ..... ............ अवधीरिताः। (राजादेशाः / गुरुजनोपदेशाः / सूपकारादेशाः)

**उत्तराणि–** (क) सूपकाराणाम्। (ख) हयशालाम्। (ग) कलहान्तानि। (घ) मेषैः। (ङ) अप्रियं। (च) कपयः।

(छ) गुरुजनोपदेशाः।

**5. अधोलिखितानां पङ्क्तीनाम् शुद्धं भावार्थं ( ✓ ) चिह्नेन चिह्नीक्रियताम्–**

**क. 'एतेषां कलहः न वानराणां हिताय' अर्थात्–**

(*i*) मेषस्य सूपकारैः सह दैनन्दिनः कलहः वानराणां विनाशकारणं भविष्यति।

(*ii*) एतेषां वानराणां परस्परिकः विवादः जनानां हिताय न अस्ति।

(*iii*) वानरेभ्यः हितकरम् एतत् यत् ते जनैः सह कलहं न कुर्युः।

**ख. 'तद्गृहं जीवितं वाञ्छन् दूरतः परिवर्जयेत्' अर्थात्–**

(*i*) यस्मिन् गृहे महान् कोलाहलः वर्तते, धनम् इच्छन् नरः तस्मात् दूरे गृहनिर्माणं कुर्यात्।

(*ii*) यत्र गृहे नित्यं सुखमयं जीवनम् अस्ति, तद्गृहं दूरतः अपि न परिवर्जितव्यम्, तत्रैव वस्तव्यम्।

(*iii*) यस्मिन् गृहे नित्यं विवादः भवति, नरः सुखेन जीवितुम् तत् गृहं कदापि न प्रविशेत् तद् दूरतः एव परिवर्जयेत्।

**ग. 'रसनास्वादलुब्धाः यूयम् अस्य कुपरिणामं न जानीथ' अर्थात्–**

(*i*) जिह्वास्वादलोभेन मेषः महानसप्रवेशस्य दुष्परिणामं न जानाति, अतः अवश्यमेव दण्डं प्राप्स्यति।

(*ii*) यूयम् सर्वे वानराः जिह्वास्वादवशाः लोलुपाः, अतः अस्य क्षणिकसुखस्य दुष्परिणामं न अवगच्छथ यत् अनेन युष्माकं विनाशः भविष्यति।

(*iii*) रसनास्वादेन लुब्धाः जनाः लोभस्य दुरन्तं न जानन्ति। तेषाम् लोभवृत्तिः तेभ्यः विनाशकारिणी भविष्यति।

**घ. 'हा हन्त! हताः वयम्। अवधीरिताः अस्माभिः गुरुजनोपदेशाः' अर्थात्–**

(*i*) घोटकाः चिन्तयन्ति—'अस्माभिः स्वस्वामिनः आज्ञापालनं न कृतम् अतः वयं दग्धाः।'

(*ii*) सूपकाराः दुःखिनः भवन्ति—'स्वराजादेशस्य पालनं न कृतम् अस्माभिः अतः वयं दण्डिताः भविष्यामः।'

(*iii*) वानराः पश्चात्तापं कुर्वन्ति—'स्वगुरुजनस्य यूथपतेः उपदेशानाम् अस्माभिः अवहेलना कृता अतः वयं विनाशोन्मुखाः।'


**उत्तराणि– (क)** (*i*) मेषस्य सूपकारैः सह दैनन्दिनः कलहः वानराणां विनाशकारणं भविष्यति। (✓)


**(ख)** (*ii*) यस्मिन् गृहे नित्यं विवादः भवति, नरः सुखेन जीवितुम् तत् गृहं कदापि न प्रविशेत्, तद् दूरतः एव परिवर्जयेत्। (✓)


**(ग)** (*ii*) यूयम् सर्वे वानराः जिह्वास्वादवशाः लोलुपाः, अतः अस्य क्षणिकसुखस्य दुष्परिणामं न अवगच्छथ यत् अनेन युष्माकं विनाशः भविष्यति। (✓)

**(घ)** (*iii*) वानराः पश्चात्तापं कुर्वन्ति—'स्वगुरुजनस्य यूथपतेः उपदेशानाम् अस्माभिः अवहेलना कृता अतः वयं विनाशोन्मुखाः।' (✓)

**6. पाठात् समुचितं वाक्यं विचित्य चित्रस्य अधः लिखत–**







........................................ ........................................ ........................................

........................................ ........................................ ........................................

**उत्तराणि–** (*i*) ज्वालमालाकुलाः अश्वाः प्राणत्राणाय इतस्ततः अधावन्।

(*ii*) सूपकारेण महानशं प्रविष्टः मेषः अर्धज्वलितम् काष्ठेन ताडितः।

(*iii*) सूपकाराणाम् मेषेण सह कलहः नूनं भवतां विनाशकारणं भविष्यति।

**7. घटनाक्रमानुसारम् अधोलिखितानि वाक्यानि पुनः लेखनीयानि–**

(क) सूपकारैः नित्यं ताडितं मेषं दृष्ट्वा वानरयूथपः वानरान् राजभवनं त्यक्तुम् अकथयत्।

(ख) राजा राजवैद्यम् आहूय अश्वरक्षायै न्यवेदयत्।

(ग) भूपतेः चन्द्रस्य पुत्राः वानरान् भोज्यपदार्थैः पुष्टिं नयन्ति स्म।

(घ) ज्वलन् स मेषः अश्वशालां प्रविष्टः। परिणामतः दग्धाः अश्वाः प्राणत्राणाय अधावन्।

(ङ) भयत्रस्ताः कपयः गुरुजनोपदेशस्य अवधीरणातः पश्चात्तापं कृतवन्तः।

(च) अन्यस्मिन् अहनि स मेषः सूपकारेण अर्धज्वलितकाष्ठेन ताडितः।

(छ) राजगृहे बालवाहनयोग्यः मेषः जिह्वालोलुपतया महानसं प्रविश्य भोजनं खादति स्म।

(ज) रसनास्वादलुब्धाः मदोद्धताः मर्कटाः तद् राजभवनं त्यक्तुं न स्वीकृतवन्तः।

**उत्तराणि–** (ग) भूपते: चन्द्रस्य पुत्रा: वानरान् भोज्यपदार्थै: पुष्टिं नयन्ति स्म।

(छ) राजगृहे बालवाहनयोग्य: मेष: जिह्वालोलुपतया महानसं प्रविश्य भोजनं खादति स्म।

(क) सूपकारै: नित्यं ताडितं मेषं दृष्ट्वा वानरयूथप: वानरान् राजभवनं त्यक्तुम् अकथयत्।

(ज) रसनास्वादलुब्धा: मदोद्धता: मर्कटा: तद् राजभवनं त्यक्तुं न स्वीकृतवन्त:।

(च) अन्यस्मिन् अहनि स मेष: सूपकारेण अर्धज्वलितकाष्ठेन ताडित:।

(घ) ज्वलन् स मेष: अश्वशालां प्रविष्ट:। परिणामत: दग्धा: अश्वा: प्राणत्राणाय अधावन्।

(ख) राजा राजवैद्यम् आहूय अश्वरक्षायै न्यवेदयत्।

(ङ) भयत्रस्ता: कपय: गुरुजनोपदेशस्य अवधीरणात: पश्चात्तापं कृतवन्त:।

**8. अधोलिखितानि वाक्यानि क: कथयति? कं प्रति कथयति?**

| कथनम् | क: | कम् |
|---|---|---|
| **यथा–मेषेण सह पाचकानां कलह: अस्माकं विनाशकारक: नूनम्।** | **वानरयूथपति:** | **कपीन्** |
| (क) वयं स्वर्गसदृशान् भोगान् विहाय अटव्यां कषायकटुरूक्षफलानि नैव भक्षयिष्याम:। | .............. | .............. |
| (ख) रसनास्वादलुब्धा: यूयम् अस्य सुखस्य कुपरिणामं न जानीथ। | .............. | .............. |
| (ग) हा! दग्धा: मे घोटका:। कथं रक्षणीया:। | .............. | .............. |
| (घ) 'हता: वयम्। अवधीरिता: अस्माभि: गुरुजनोपदेशा:।' | .............. | .............. |

**उत्तराणि–**

| (क) | | कम् |
|---|---|---|
| (क) कपय: | — | वानरयूथपतिम् |
| (ख) वानरयूथपति: | — | वानरान् |
| (ग) राजा | — | वैद्यान् |
| (घ) वानरा: | — | आत्मानम् |

**9. अधोलिखितपदानां मूलशब्दं विभक्तिं वचनं लिङ्गं च लिखत–**

| | पदम् | मूलशब्द: | विभक्ति: | वचनम् | लिङ्गम् |
|---|---|---|---|---|---|
| **यथा–** | **नगरे** | **नगर** | **सप्तमी** | **एकवचन** | **नपुंसकलिङ्गम्** |
| | **(क)** सूपकाराणाम् | .................. | .................. | .................. | .................. |
| | **(ख)** भोज्यपदार्थै: | .................. | .................. | .................. | .................. |
| | **(ग)** महानसम् | .................. | .................. | .................. | .................. |
| | **(घ)** वेदनया | .................. | .................. | .................. | .................. |
| | **(ङ)** हर्म्याणि | .................. | .................. | .................. | .................. |
| | **(च)** वह्निना | .................. | .................. | .................. | .................. |
| | **(छ)** प्राणत्राणाय | .................. | .................. | .................. | .................. |
| | **(ज)** भूमौ | .................. | .................. | .................. | .................. |
| | **(झ)** कपय: | .................. | .................. | .................. | .................. |

**उत्तराणि–**

| प्रथम | मूलशब्द: | विभक्ति: | वचनम् | लिङ्गम् |
|---|---|---|---|---|
| **(क)** सूपकाराणाम् | सूपकार | षष्ठी | बहुवचनम् | पुल्लिङ्गम् |
| **(ख)** भोज्यपदार्थै: | भोज्यपदार्थ | तृतीया | बहुवचनम् | पुल्लिङ्गम् |
| **(ग)** महानसम् | महानस | द्वितीया | एकवचनम् | पुल्लिङ्गम् |
| **(घ)** वेदनया | वेदना | तृतीया | एकवचनम् | स्त्रीलिङ्गम् |
| **(ङ)** हर्म्याणि | हर्म्य | प्रथमा / द्वितीया | बहुवचनम् | नपुंसकलिङ्गम् |
| **(च)** वह्निना | वह्नि | तृतीया | एकवचनम् | पुल्लिङ्गम् |
| **(छ)** प्राणत्राणाय | प्राणत्राण | चतुर्थी | एकवचनम् | नपुंसकलिङ्गम् |
| **(ज)** भूमौ | भूमि | सप्तमी | एकवचनम् | स्त्रीलिङ्गम् |
| **(झ)** कपय: | कपि | प्रथमा | बहुवचनम् | पुल्लिङ्गम् |

**10. 'क' स्तम्भे विशेषणपदानि 'ख' स्तम्भे च विशेष्यपदानि दत्तानि, तेषां समुचितमेलनं कुरुत–**

| **'क' स्तम्भ:** | **'ख' स्तम्भ:** |
|---|---|
| (*i*) कुवाक्यान्तम् | (क) मेष: |
| (*ii*) मदोद्धता: | (ख) यश: |
| (*iii*) ऊर्णाप्रचुर: | (ग) हर्म्याणि |
| (*iv*) कुराजान्तानि | (घ) यूथपति: |
| (*v*) मृण्मयम् | (ङ) कपय: |
| (*vi*) कलहान्तानि | (च) राष्ट्राणि |
| (*vii*) साश्रुनयन: | (छ) सौहृदम् |
| (*viii*) कुकर्मान्तम् | (ज) भाजनम् |

**उत्तराणि–**

| | |
|---|---|
| (*i*) कुवाक्यान्तम् | (छ) सौहृदम् |
| (*ii*) मदोद्धता: | (ङ) कपय: |
| (*iii*) ऊर्णाप्रचुर: | (क) मेष: |
| (*iv*) कुराजान्तानि | (च) राष्ट्राणि |
| (*v*) मृण्मयम् | (ज) भाजनम् |

(*vi*) कलहान्तानि (ग) हर्म्याणि
(*vii*) साश्रुनयनः (घ) यूथपतिः
(*viii*) कुकर्मान्तम् (ख) यशः

11. **(अ) रेखाङ्कितानि सर्वनामपदानि कस्मै प्रयुक्तानि? समक्षं प्रदत्तस्थाने लिखत–**

**यथा–** **अस्माकं** विनाशकः भविष्यति। वानरेभ्यः

(क) तस्य पुत्राः वानरैः सह क्रीडन्ति स्म। ..............................
(ख) एतेषां कलहः न वानराणां हिताय। ..............................
(ग) सर्वेषां संक्षयः न भवेत्। ..............................
(घ) वयम् अटव्यां रूक्षफलानि नैव भक्षयिष्यामः। ..............................
(ङ) अहं तु वनं गच्छामि। ..............................
(च) हा! दग्धाः मे घोटकाः। ..............................
(छ) अवधीरिताः अस्माभिः गुरुजनोपदेशाः। ..............................
(ज) यूयम् अस्य कुपरिणामं न जानीथ। ..............................

**(आ) कोष्ठकात् समुचितं पदं विचित्य रिक्तस्थानानि पूरयत–**

(क) .................... नगरे चन्द्रः भूपतिः प्रतिवसति स्म। (कस्याञ्चित् / कस्मिंश्चित्)
(ख) .................... एव राजगृहे मेषयूथम् अपि आसीत्। (तस्य / तस्मिन्)
(ग) .................... अहनि स मेषः महानसं प्रविशति। (अन्यस्मिन् / पूर्वस्मिन्)
(घ) .................... क्षितौ प्रलुठतः तृणेषु अग्निज्वालाः समुत्थिताः। (तस्यः / तस्य)
(ङ) .................... भयत्रस्ताः कपयः अचिन्तयन्। (सर्वाः / सर्वे)

**उत्तराणि–** **(अ)** (क) चन्द्राय (ख) मेषाय सूपकारेभ्यः च (ग) कपिभ्यः (घ) कपिभ्यः (ङ) यूथपतये (च) चन्द्राय (छ) वानरेभ्यः (ज) वानरेभ्यः।

**(आ)** (क) कस्मिंश्चित् (ख) तस्मिन् (ग) अन्यस्मिन् (घ) तस्य (ङ) सर्वे।

12. **अधः समस्तपदानां विग्रहाः दत्ताः। उदाहरणम् अनुसृत्य समस्तपदानि लिखत–**

| विग्रहाः | समस्तपदानि | |
|---|---|---|
| **यथा–** मेषाणां मध्ये | मेषमध्ये | (षष्ठी तत्पुरुषः) |
| वानराणां हिताय | ................ | (          ) |
| प्राणानां त्राणाय | ................ | (          ) |
| कपीनां मेदसा | ................ | (          ) |
| राज्ञः आदेशम् | ................ | (          ) |
| जिह्वायाः लोलुपतया | ................ | (          ) |
| अश्वानां नाशः | ................ | (          ) |
| यूथस्य पतिः | ................ | (          ) |

**उत्तराणि–**
वानरहिताय — षष्ठी तत्पुरुषः
प्राणत्राणाय — षष्ठी तत्पुरुषः
कपिमेदसा — षष्ठी तत्पुरुषः
राजादेशम् — षष्ठी तत्पुरुषः
जिह्वालोलुपतया — षष्ठी तत्पुरुषः
अश्वनाशः — षष्ठी तत्पुरुषः
यूथपतिः — षष्ठी तत्पुरुषः

**13. (अ) स्थूलाङ्कित-कर्तृपदे तृतीयाविभक्तिं प्रयुज्य कर्मवाच्ये रिक्तस्थानानि पूरयत–**

| कर्तृवाच्यम् | कर्मवाच्यम् |
|---|---|
| **यथा–** **वानरयूथपतिः** उक्तवान्। | वानरयूथपतिना उक्तम्। |
| (क) **अश्वाः** प्राणत्राणाय इतस्ततः धावितवन्तः। | (क) ........................ प्राणत्राणाय इतस्ततः धावितम्। |
| (ख) राजादेशं श्रुत्वा **कपयः** चिन्तितवन्तः। | (ख) राजादेशं श्रुत्वा ........................ चिन्तितम्। |
| (ग) **सूपकाराः** मेषं काष्ठेन ताडितवन्तः। | (ग) ........................ मेषः काष्ठेन ताडितः। |
| (घ) **कपयः** प्रहस्य तम् उक्तवन्तः। | (घ) ........................ प्रहस्य सः उक्तः। |
| (ङ) **राजा** वैद्यान् आहूय पृष्टवान्। | (ङ) ........................ वैद्याः आहूय पृष्टाः। |

अत्र परिवर्तितं क्रियारूपम् अपि च ध्यानपूर्वकं दृष्ट्वा परिवर्तनस्य कारणं चिन्तयत।

**उत्तराणि–** (क) अश्वैः (ख) कपिभिः (ग) सूपकारैः (घ) कपिभिः (ङ) राज्ञा।

**(आ) स्थूलाङ्कितेषु पदेषु प्रथमाविभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत–**


| कर्मवाच्यम् | कर्तृवाच्यम् |
|---|---|
| **यथा–** **विद्वद्भिः** साधु उक्तम्। | **विद्वांसः** साधु उक्तवन्तः। |
| (क) स मेषः **सूपकारेण** ताडितः। | (क) तं मेषं ........................ ताडितवान्। |
| (ख) **वानरयूथपतिना** कपिभ्यः हितं वचनं कथितम्। | (ख) ........................ कपिभ्यः हितं वचनं कथितवान्। |
| (ग) **त्वया** किमिदम् उक्तम्? | (ग) ........................ किमिदम् उक्तवान्? |
| (घ) **अस्माभिः** गुरुजनोपदेशाः अवधीरिताः। | (घ) ........................ गुरुजनोपदेशान् अवधीरितवन्तः। |
| (ङ) सपदि **भवता** उपायः क्रियताम्। | (ङ) सपदि ........................ उपायं करोतु। |


अत्र अपि परिवर्तितं क्रियारूपं ध्यानपूर्वकं दृष्ट्वा परिवर्तनस्य कारणं चिन्तयत।


**उत्तराणि–** (क) सूपकारः (ख) वानरयूथपतिः (ग) त्वम् (घ) वयम् (ङ) भवान्।


**14. अधः मञ्जूषायां प्रत्येकशब्दस्य त्रीणि समानार्थकानि पदानि दत्तानि तानि चित्राणां समक्षं लिखत–**


**अग्नि, वानरः, घोटकः, भूपतिः, सूपकारः, कपिः, राजा, वह्निः, अश्वः, हयः, मर्कटः, नृपः, अनलः, औदनिकः, पाचकः।**




**उत्तराणि–**

| | | | |
|---|---|---|---|
| (*i*) | 1. वानरः | 2. मर्कटः | 3. कपिः। |
| (*ii*) | 1. नृपः | 2. राजा | 3. भूपतिः। |
| (*iii*) | 1. अनलः | 2. अग्निः | 3. वह्निः। |
| (*iv*) | 1. पाचकः | 2. सूपकारः | 3. औदनिकः। |
| (*v*) | 1. घोटकः | 2. अश्वः | 3. हयः। |

## योग्यता-विस्तार
## (परीक्षाकृते नास्ति)

**(क) ग्रन्थपरिचयः**

'पञ्चतन्त्रम्' पण्डितवरेण विष्णुशर्मणा प्रणीतः संसारे प्रसिद्धः नीतिग्रन्थोऽस्ति। अस्मिन् ग्रन्थे कथानां पात्राणि प्रायः पशवः पक्षिणश्च सन्ति। तेषां माध्यमेन नीतिशास्त्रस्य गहनतत्त्वमपि अतिसरलतया अत्र प्रतिपादितम् अस्ति। अस्याः अनुवादः जगतः पञ्चाशदधिकासु भाषासु कृतः। अस्य पञ्च विभागाः सन्ति—1. मित्रभेदः 2. मित्रसम्प्राप्तिः 3. काकोलूकीयम् 4. लब्धप्रणाशः।

1. अपरीक्षितकारकम् च। प्रस्तुतकथा अन्तिमतन्त्रात् अपरीक्षितकारकात् उद्धृता।

### हिंदी अनुवाद (Hindi Translation)

'पञ्चतन्त्र' पण्डित विष्णुशर्मा द्वारा रचित विश्वप्रसिद्ध नीतिग्रन्थ है। इस ग्रन्थ में कथाओं के पात्र प्रायः पशु-पक्षी हैं। उनके माध्यम से नीतिशास्त्र के गहन तत्त्व भी बहुत सरलता से यहाँ प्रतिपादित किए गए हैं। इसका अनुवाद संसार की पचास से भी अधिक भाषाओं में किया गया है। इसके पाँच विभाग हैं—1. मित्रभेद, 2. मित्रसम्प्राप्तिः, 3. काकोलुकीयम्, 4. लब्धप्रणाशः, 5. अपरीक्षितकारकम्। यह कथा अन्तिम तन्त्र अपरीक्षितकारक से ली गई है।

**(ख) लोभः**

(क) लोभात्क्रोधः प्रभवति लोभात्कामः प्रजायते।
लोभान्मोहश्च नाशश्च लोभः पापस्य कारणम्॥

(ख) लोभाविष्टो नरो वित्तं वीक्षते न स चापदम्।
दुग्धं पश्यति मार्जारो न तथा लगुडाहतिम्॥

(ग) लोभेन बुद्धिश्चलति लोभो जनयते तृषाम्।
तृषार्तो दुःखमाप्नोति परत्रेह च मानवः॥

### हिंदी अनुवाद (Hindi Translation)

**लालच**

(क) लालच से क्रोध उत्पन्न होता है। लालच से काम उत्पन्न होता है। लालच से मोह और नाश उत्पन्न होते हैं। लालच पाप का कारण है।

(ख) लालच में फँसा हुआ मनुष्य धन को ही देखता है विपत्ति को नहीं। जिस प्रकार बिलाव दूध को ही देखता है, लाठी की चोट को नहीं।

(ग) लालच से बुद्धि विचलित हो जाती है। लालच धन की प्यास को जन्म देता है। प्यासा व्यक्ति दुःख प्राप्त करता है।

**गुरुः**

(क) गु शब्दस्त्वन्धकारे स्यात् रु शब्दस्तन्निरोधके।
अन्धकारनिरोधित्वाद् गुरुरित्यभिधीयते॥

(ख) आचिनोति हि शास्त्रार्थमाचारे स्थापयत्यपि।
स्वयमाचरते यस्मादाचार्यः परिकीर्त्यते॥

### हिंदी अनुवाद (Hindi Translation)

**गुरु**

(क) गु शब्द का अर्थ अन्धकार है तथा रु शब्द उसे रोकने के अर्थ में प्रयुक्त होता है, अतः अज्ञानरूपी अन्धकार को दूर करने वाला गुरु होता है।

(ख) जो शास्त्रों के अर्थ को अपने आचरण में भी स्थापित करता है, स्वयं उनका आचरण करता है, वही आचार्य कहा जाता है।

### इन्द्रियनिग्रहः

(क) इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ॥

(ख) इन्द्रियाणां विसर्गेण दोषमृच्छत्यसंशयम्।
संनियम्य तु तान्येव ततः सिद्धिमवाप्नुयात्॥

(ग) जितेन्द्रिया जितक्रोधा जितमानमदास्तथा।
लोभमात्सर्यहीना ये ते नराः स्वर्गगामिनः॥

### हिंदी अनुवाद (Hindi Translation)

**इन्द्रियनिग्रह**

(क) इन्द्रियों तथा इन्द्रियों के विषयों में राग और द्वेष विद्यमान होते हैं। यदि व्यक्ति उन्हें वश में नहीं कर सकता तो राग और द्वेष का अनुगामी हो जाता है।

(ख) इन्द्रियों को वश में करके ही मनुष्य सफलता प्राप्त कर सकता है।

(ग) जिन व्यक्तियों ने इन्द्रियों, क्रोध, मन और मद को जीत लिया है जो लालच और ईर्ष्या से रहित हैं, वे मनुष्य ही स्वर्ग जाने वाले हैं।

## परीक्षोपयोगी अन्य महत्त्वपूर्ण प्रश्नोत्तराणि

**1. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत–** **5**

(अ) अथ अन्यस्मिन् अहनि स मेषो यावत् महानसं प्रविशति तावत् सूपकारेण अर्धज्वलितकाष्ठेन ताडितः। ऊर्णाप्रचुरः मेषः वह्निना जाज्वल्यमानशरीरः निकटस्थां अश्वशालां प्रविशति दाहवेदनया च भूमौ लुठति। तस्य क्षितौ प्रलुठतः तृणेषु वह्निज्वालाः समुत्थिताः। ज्वालमालाकुलाः अश्वाः प्राणत्राणाय इतस्ततः अधावन्। तेषु केचिद् दग्धाः केचिद् अर्धदग्धाः केचन च पञ्चत्वं गताः। दग्धां हयशालां विज्ञाय सविषादः राजा शालिहोत्रज्ञान् वैद्यान् आहूय अपृच्छत् 'हा! दग्धाः मे घोटकाः कथं रक्षणीयाः? सपदि उपायः क्रियताम्।' तदा राजवैद्यः प्रोवाच—

**कपीनां मेदसा दोषो वह्निदाहसमुद्भवः।**
**अश्वानां नाशमभ्येति तमः सूर्योदये यथा॥**

**(I) एकपदेन उत्तरत–** **½ × 2 = 1**

(*i*) दाहवेदनया कः भूमौ लुठति?
(*ii*) तमः कः नाशयति?

**(II) पूर्णवाक्येन उत्तरत–** **1 × 1 = 1**

(*i*) किं ज्ञात्वा नृपः सविषादः अभवत्?
(*ii*) अश्वानां वह्निदोषः कथं शाम्यते?

**(III) भाषिककार्यम्–** **1 × 3 = 3**

(*i*) 'ऊर्णाप्रचुरः मेषः' इति अनयोः पदयोः किं पदं विशेषणपदम्?
(क) ऊर्णाप्रचुरः (ख) प्रचुरः (ग) मेषः (घ) ऊर्णा
(*ii*) 'अश्वाः' इति शब्दस्य पर्यायः गद्यांशात् चित्वा लिखत।
(क) दग्धाः (ख) समुत्थिताः (ग) घोटकाः (घ) हयाः

**उत्तराणि– (I)** (*i*) मेषः (*ii*) सूर्यः।
**(II)** (*i*) दग्धां हयशालां विज्ञाय नृपः सविषादः अभवत्।
(*ii*) अश्वानां वह्निदोषः कपीनाम् मेदसा शाम्यते।
**(III)** (*i*) (क) ऊर्णाप्रचुरः। (*ii*) (ग) घोटकाः

**(आ)** कस्मिंश्चित् नगरे चन्द्रो नाम भूपतिः प्रतिवसति स्म। तस्य पुत्राः वानरक्रीडारताः वानरयूथं नित्यमेव विविधैः भोज्यपदार्थैः पुष्टिं नयन्ति स्म। तस्मिन् राजगृहे बालवाहनयोग्यं मेषयूथम् आसीत्। तेषां मेषाणां मध्ये एको मेषः जिह्वालोलुपतया अहर्निशं महानसं प्रविश्य यत् पश्यति तद् भक्षयति। ते च सूपकाराः यत्किञ्चित् काष्ठं मृण्मयं भाजनं कांस्य-ताम्रपात्रं वा पश्यन्ति तेन तम् आशु ताडयन्ति स्म। मेषस्य सूपकाराणां कलहम् अवेक्ष्य नीतिविदाम् अग्रणी वानरयूथपतिः अचिन्तयत् 'एतेषां कलहो न वानराणां हिताय।' एवं विचार्य स यूथपः सर्वान् कपीन् आहूय रहसि अवदत् ''सूपकाराणां मेषेण सह एषः कलहः नूनं भवतां विनाशकारणं भविष्यति।'' उक्तम् हि— 5

**तस्मात् स्यात् कलहो यत्र गृहे नित्यमकारणः।**
**तद्गृहं जीवितं वाञ्छन् दूरतः परिवर्जयेत्॥**

**(I) एकपदेन उत्तरत–** **½ × 2 = 1**

(*i*) भूपतेः नाम किम् आसीत?
(*ii*) कः महानसं प्रविश्य यत् पश्यति तद् भक्षयति?

**(II) एकवाक्येन उत्तरत–** **1 × 2 = 2**

(*i*) केषां कलहः वानाराणां हिताय न आसीत्?
(*ii*) यदि जनः जीवितुं वाञ्छति तर्हि सः कीदृशं गृहं त्यजेत्?

**(III) भाषिककार्यम्–** **½ × 4 = 2**

(*i*) 'दृष्ट्वा' इति अर्थे उपरिलिखिते गद्यांशे किम् पदं प्रयुक्तम्?
(क) प्रविश्य (ख) अवेक्ष्य (ग) विचार्य (घ) आहूय
(*ii*) 'पुत्राः वानरक्रीडारताः' अनयोः पदयोः विशेषणपदं किम्?
(क) रताः (ख) वानक्रीडा (ग) पुत्राः (घ) वानरक्रीडारताः
(*iii*) 'अवदत्' इति क्रियायाः कर्तृपदं किम्?
(क) यूथपः (ख) नृपः (ग) बालकः (घ) कपीन
(*iv*) 'चिरम्' इत्यस्य पदस्य कः विपर्ययः अत्र प्रयुक्तः?
(क) कलहम् (ख) नूनम् (ग) आशुं (घ) उक्तम्

**उत्तराणि–** **(I)** (*i*) चन्द्रः (*ii*) मेषः।

**(II)** (*i*) सूपकाराणां मेषस्य च कलहः वानराणां हिताय न आसीत्।

(*ii*) यदि जनः जीवितुं वाञ्छति तर्हि सः तत् गृहं त्यजेत् यस्मिन् नित्यम् अकारणः कलहः भवति।

**(III)** (*i*) (ख) अवेक्ष्य (*ii*) (घ) वानरक्रीडारताः (*iii*) (क) यूथपः (*iv*) (ग) आशु।

**2. रेखाङ्कितपदम् आधृत्य प्रश्ननिर्माणं कुरुत–** **5**

(*i*) सूर्योदये तमः नश्यति।

(*ii*) राजा वैद्यान् आहूय अश्वरक्षार्थम् अपृच्छत्।

(*iii*) केचन च पञ्चत्वं गताः।

(*iv*) हा! दग्धाः मे घोटकाः कथं रक्षणीयाः।

(*v*) मदोद्धताः कपयः प्रहस्य अवदन्।

**उत्तराणि–** (*i*) किम् (*ii*) कान् (*iii*) कुत्र (*iv*) के (*v*) कीदृशाः।

**3. अधोलिखितासु पंक्तिषु स्थूलाक्षरपदानाम् प्रसङ्गानुसारम् शुद्धम् अर्थम् चिनुत–** **½ × 6 = 3**

**I.** अहर्निशं **महानसं** प्रविश्य यत् पश्यति तद् भक्षयति।

(क) महाराज्ञः (ख) महत् आसनम् (ग) पाकशालाम् (घ) अश्वशालाम्

**उत्तराणि–** (ग) पाकशालाम्।

**II.** समन्तात् वर्धमानाः अनलशिखाः आकाशं लिहन्ति।

(क) परितः (ख) सामान्यतः (ग) समो भूत्वा (घ) समस्तम्

**उत्तराणि–** (क) परितः।

**III.** सः यूथपः सर्वान् कपीन् आहूय रहसि अवदत्।

(क) रहस्ये (ख) एकान्ते (ग) बहिः (घ) अन्ते

**उत्तराणि–** (ख) एकान्ते।

**IV.** ततः सर्वेषां संक्षयो न भवेत्।

(क) क्षतिः (ख) नाशः (ग) मृतः (घ) संचयः

**उत्तराणि–** (ख) नाशः।

**V.** वयं अटव्यां रुक्षफलनि नैव भक्षयिष्यामः।

(क) गृहे (ख) मार्गे (ग) वने (घ) उद्याने

**उत्तराणि–** (ग) वने।

**VI.** सपदि उपायः क्रियताम्।

(क) शीघ्रं (ख) शनैः (ग) चिर् (घ) अल्पं

**उत्तराणि–** (क) शीघ्रं।

**4. अधोलिखितश्लोकयोः अन्वयम् उचितपदेन पूरयित्वा उत्तरपुस्तिकायाम् पुनः लिखत–**

**1. कपीनां मेदसा दोषो वह्निदाहसमुद्भवः।** **½ × 4 = 2**
**अश्वानां नाशमभ्येति तमः सूर्योदये यथा॥**

**अन्वय–** (i) .................. वह्निदाहसमुद्भवः (ii) .................. कपीनां मेदसा नाशम् (iii) .................. यथा (iv) .................. तमः।

**मञ्जूषा–** अभ्येति, दोषः, सूर्योदये, अश्वानां

**उत्तराणि–** (i) अश्वानां (ii) दोषः (iii) अभ्येति (iv) सूर्योदये।

**2. मित्ररूपाः हि रिपवः सम्भाष्यन्ते विचक्षणैः।** **½ × 4 = 2**
**ये हितं वाक्यमुत्सृत्य विपरीतोपसेविनः॥**

**अन्वय–** ये (i) .................. वाक्यम् (ii) .................. विपरीतोपसेविनः (ते) हि (iii) .................. मित्ररूपाः रिपवः (iv) ..................।

**मञ्जूषा–** सम्भाष्यन्ते, हितम्, विचक्षणैः, उत्सृज्य

**उत्तराणि–** (i) हितम् (ii) उत्सृज्य (iii) विचक्षणैः (iv) सम्भाष्यन्ते।

**5. घटनाक्रमानुसारं निम्नलिखितपदानि पुनः लिखत–** **½ × 8 = 4**

(*i*) राजगृहे जिह्वालोलुपः एकः मेषः महानसं प्रविश्य यत् किमपि खादति स्म।

(*ii*) तत्रस्थान् दग्धान् अश्वान् दृष्ट्वा राज्ञा वैद्याः आहूताः।

(*iii*) मेषताडनं दृष्ट्वा वानरयूथपः कपीन् राजभवनं त्यक्तुम् अकथयत्।

(*iv*) वानरमेदः एव औषधम् इति श्रुत्वा मृत्युभयात् कपयः पश्चात्तापम् अकुर्वन्।

(*v*) एकस्मिन् प्रासादे चन्द्रनाम भूपतेः पुत्राः वानरैः सह क्रीडन्ति स्म।

(*vi*) यदा वानराः स्वर्गतुल्यान् भोज्यपदार्थान् त्यक्तुं न ऐच्छन् तदा वानरयूथपः एकाकी वनमगच्छत्।

(*vii*) सूपकाराः तं येन केन पदार्थेन ताडयन्ति स्म।

(*viii*) एकदा ज्वलितकाष्ठेन ताडितः ज्वलन् मेषः अश्वशालां प्राविशत्।

**उत्तराणि–** (*v*) एकस्मिन् प्रासादे चन्द्रनाम भूपतेः पुत्राः वानरैः सह क्रीडन्ति स्म।

(*i*) राजगृहे जिह्वालोलुपः एकः मेषः महानसं प्रविश्य यत् किमपि खादति स्म।

(*vii*) सूपकाराः तं येन केन पदार्थेन ताडयन्ति स्म।

(*iii*) मेषताडनं दृष्ट्वा वानरयूथपः कपीन् राजभवनं त्यक्तुम् अकथयत्।

(*vi*) यदा वानराः स्वर्गतुल्यान् भोज्यपदार्थान् त्यक्तुं न ऐच्छन् तदा वानरयूथपः एकाकी वनमगच्छत्।
(*viii*) एकदा ज्वलितकाष्ठेन ताडितः ज्वलन् मेषः अश्वशालां प्राविशत्।
(*ii*) तत्रस्थान् दग्धान् अश्वान् दृष्ट्वा राज्ञा वैद्याः आहूताः।
(*iv*) वानरमेदः एव औषधम् इति श्रुत्वा मृत्युभयात् कपयः पश्चात्तापम् अकुर्वन्।

**6. निम्नलिखितकथनयोः भावम् उपयुक्तशब्दैः पूरयत–** $1 \times 2 = 2$

**तस्मात् स्यात् कलहो यत्र गृहे नित्यमकारणः।**
**तद्गृहं जीवितं वाञ्छन् दूरतः परिवर्जयेत्॥**

**भावः–** अस्य भावः अस्ति यदि कश्चित् नरः सुखं जीवनं च इच्छति तर्हि सः तत् (i) .................. अवश्यमेव त्यजेत् यत्र नित्यम् कलहः भवति। यतो हि (ii) .................. कलहः सर्वदा विनाशस्य कारणं भवति।

**उत्तराणि–** (i) गृहम् (ii) अकारणः।

**7. निम्नलिखितकथनयोः भावम् उपयुक्तशब्दैः पूरयत–** $1 \times 2 = 2$

**तस्मात् स्यात् कलहो यत्र गृहे नित्यमकारणः।**
**तद्गृहं जीवितं वाञ्छन् दूरतः परिवर्जयेत्॥**

**भावः–** तस्मात् यत्र गृहे नित्यम् अकारणः कलहः स्यात् (i) .................. वाञ्छन् तद्गृहं (ii) .................. परिवर्जयेत्।

**उत्तराणि–** (i) जीवितं (ii) दूरतः।

**8. अधोलिखितं गद्यांशं पठित्वा तत्-आधारितान् प्रश्नान् उत्तरपुस्तिकायाम् उत्तरत–** 5

अथ एकस्मिन् अहनि स मेषो यावत् महानसं प्रविशति तावत् सूपकारेण अर्धज्वलितकाष्ठेन ताडितः। ऊर्णाप्रचुरः मेषः वह्निना जाज्वल्यमानशरीरः निकटस्थाम् अश्वशालां प्रविशति, दाहवेदनया च भूमौ लुठति। तस्य भूमौ प्रलुठतः तृणेषु वह्निज्वालाः समुत्थिताः। ज्वालमालाकुलाः अश्वाः प्राणत्राणाय इतस्ततः अधावन्। तेषु केचिद् दग्धाः, केचिद् अर्धदग्धाः केचन च पञ्चत्वं गताः।

**(I) एकपदेन उत्तरत–** $\frac{1}{2} \times 4 = 2$

(*i*) वह्निना जाज्वल्यमानशरीरः मेषः कुत्र प्रविशति ?
(*ii*) अश्वाः प्राणत्राणाय कुत्र अधावन्?
(*iii*) मेषः केन अर्धज्वलितकाष्ठेन ताडितः ?
(*iv*) दाहवेदनया मेषः भूमौ किं करोति ?

**(II) पूर्णवाक्येन उत्तरत–** $1 \times 1 = 1$

यदा मेषः भूमौ अलुठत् तदा किम् अभवत् ?

**(III) निर्देशानुसारम् उत्तरम्–** $\frac{1}{2} \times 4 = 2$

(*i*) 'दिने' अस्य पर्यायपदं गद्यांशात् चित्वा उत्तरपुस्तिकायां लिखत।
(क) दिवसे (ख) अहनि (ग) एकस्मिन् (घ) भूमौ
(*ii*) "तेषु केचिद् दग्धाः।" अत्र क्रियापदं किम् ?
(क) के (ख) केचिद् (ग) तेषु (घ) दग्धाः
(*iii*) "केचन पञ्चत्वं गताः" अत्र कर्तृपदं किम्।
(क) गताः (ख) गतः (ग) केचन (घ) पञ्चत्वं
(*iv*) "तस्य भूमौ प्रलुठतः" अत्र "तस्य" इति सर्वनाम पदं कस्मै प्रयुक्तम्।
(क) अश्वाय (ख) मेषाय (ग) सूपकाराय (घ) नृपाय

**उत्तराणि–** **(I)** (*i*) महानसम् (*ii*) इतस्ततः (*iii*) सूपकारेण (*iv*) लुठति।
**(II)** (*i*) यदा मेषः भूमौ अलुठत् तदा तृणेषु वह्निज्वालाः समुत्थिताः।
**(III)** (*i*) (ख) अहनि (*ii*) (घ) दग्धाः (*iii*) (ग) केचन (*iv*) (ख) मेषाय।

9. **अधोलिखितं गद्यांशं पठित्वा तत्-आधारितान् प्रश्नान् उत्तरपुस्तिकायाम् उत्तरत–** **5**

ज्वालमालाकुला: अश्वा: प्राणत्राणाय इतस्तत: अधावन्। तेषु केचिद् दग्धा:, केचिद् अर्धदग्धा:, केचन च पञ्चत्वं गता:। दग्धां हयशालां विज्ञाय सविषाद: राजा शालिहोत्रज्ञान् वैद्यान् आहूय अपृच्छत्—हा! दग्धा: मे घोटका: कथं रक्षणीया: ? सपदि उपाय क्रियताम्।

**(I) एकपदेन उत्तरत–** **½ × 4 = 2**

(*i*) के दग्धा: जाता: ?

(*ii*) क: सविषाद: अभवत् ?

(*iii*) अश्वा: किमर्थम् इतस्तत: अधावन् ?

(*iv*) राजा कान् आहूय उपायम् अपृच्छत् ?

**(II) पूर्णवाक्येन उत्तरत–** **1 × 1 = 1**

अश्वा: काभि: व्याकुला: आसन् ?

**(III) निर्देशानुसारम् उत्तरम्–** **½ × 4 = 2**

(*i*) 'केचन' इति सर्वनामपदं केभ्य: प्रयुक्तम् ?

(क) नृपाय (ख) राजपुत्रेभ्य: (ग) अश्वेभ्य: (घ) मेषेभ्य:

(*ii*) 'ज्ञात्वा' इति स्थाने किं पदम् अत्र प्रयुक्तम् ?

(क) विज्ञाय (ख) अनुज्ञाय (ग) उपज्ञाय (घ) आज्ञाय

(*iii*) 'शीघ्रम्' इति कस्य अव्ययपदस्य अर्थ: ?

(क) कथं (ख) सपदि (ग) हा (घ) आहूय

(*iv*) 'वैद्यान्' इतिपदस्य किं विशेषणम् अत्र प्रयुक्तम् ?

(क) सविषाद: (ख) केचन (ग) आहूय (घ) शालिहोत्रज्ञान्

**उत्तराणि–** **(I)** (*i*) अश्वा: (*ii*) राजा (*iii*) प्राणत्राणाय (*iv*) वैद्यान्।

**(II)** अश्वा: ज्वालमालाभि: व्याकुला: आसन्।

**(III)** (*i*) (ग) अश्वेभ्य: (*ii*) (क) विज्ञाय (*iii*) (ख) सपदि (*iv*) (घ) शालिहोत्रज्ञान्।

## मूल्यपरक प्रश्ना: (VBQs)

**वाक्यानि पठित्वा वाक्याधारितान् प्रश्नाम् उत्तरत–**

**प्रश्ना:** (*i*) 'एतेषां कलहो न वानराणां हिताय।' इति वाक्ये केषां कलह: वर्णितो वर्तते?

(*ii*) 'रसनास्वाद लुब्धा: यूयम् अस्य सुखस्य कुपरिणामं न जानीथ।' जिह्वाया: सुखस्य परिणाम: कीदृशो भवति?

(*iii*) 'अश्वानां नाशमभ्येति तम: सूर्योदये यथा।' अत्र कदा तम: नश्यति, इति वर्णितम्?

(*iv*) 'कुवाक्यान्तं च सौहृदम्।' दुर्वचनानि किम् नाश्यन्ति?

(*v*) 'मित्ररुपा: हि रिपव: सम्भाष्यन्ते विचक्षणै:।' अत्र विपरीतसेविनं मित्रं किं कथितम्?

**उत्तराणि–** (*i*) मेष-सूपकाराणाम् (*ii*) कुपरिणाम: (*iii*) सूर्योदये (*iv*) सौहृदम् (*v*) शत्रुम् (शत्रु:)